National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 185-186
© 2026 NJHSR
www.sanskritarticle.com

**डॉ० आभा जैन**
व्याकरणाचार्या,
ज०रा०राजस्थानसंस्कृत विश्व-
विद्यालयः, जयपुरम्।

**Correspondence:**
**डॉ० आभा जैन**
व्याकरणाचार्या,
ज०रा०राजस्थानसंस्कृत विश्व-
विद्यालयः, जयपुरम्।

# असिद्धं बहिरङ्गमन्तरङ्गे इति परिभाषयाः विश्लेषणं

**डॉ० आभा जैन**

**शोधसारः**

असिद्धं बहिरङ्गमन्तरङ्गे "इति परिभाषायाः तात्पर्य भवति यत् अन्तरङ्ग शास्त्रस्य दृष्ट्या बहिरङ्ग, शास्त्रं असिद्धं भवति इति। नित्यादप्यन्तरङ्ग बलीयः, अन्तरङ्गे बहिरङ्गस्यासिद्धत्वात्। तदाह असिद्धं बहिरङ्गमन्तरङ्गे।

अन्तर्मध्ये बहिरङ्गशास्त्रीय निमित्तसमुदायमध्ये अन्तर्भूता न्यङ्गानि निमित्तानि यस्य तदत्तरङ्गम्। एवं तदीयनिमित्तसमुदायाद् बहिर्भूताङ्गकं बहिरङ्गम्। एतच्च खरवसानयोः इति सूत्रे असिद्धवत् सूत्रे च भाष्यकैयट्योः स्पष्टम्।

अत्र अङ्गशब्देन शब्दरूपं निमित्तमेव गृह्यते। शब्द शास्त्रे तस्यैव प्रधानत्वात्। तेनार्थनिमित्तकस्य नबहिरङ्गत्वम्। अतएव नतिसृचतसृ इति निषेधश्चरितार्थः। अन्यथा स्त्रीत्वरूपार्थनिमितकतिस्र-पेक्षयाऽन्तरङ्गत्वात्। त्रयादेशे तदसङ्गतिः स्पष्टैव। अतएवत्रयादेशे सन्तस्य प्रतिषेधः। इति स्थानिवत्सूत्रस्थभाष्यवार्तिकादि संगच्छते।

एतेन "गौधेरः" "पचेत्" इत्यादावेयादीमाङ्ग संज्ञासापेक्ष त्वेन बहिरङ्गतयाऽसिद्ध त्वात् पलिलोपो नस्यादितिपरास्तम्। एयादेशादेरपर निमित्त कत्वेवनान्तरङ्गत्वाच्च।

ननुयेन विधिस्तदन्तस्य इति सूत्रे भाष्ये "इकोयणचि इत्यादावपि तदन्तविधौ स्योन" इत्यत्रान्तरङ्ग, त्वाद्यणो गुणबाधक त्वमिष्यते तन्न सिध्येत्। ऊन शब्दमाश्रित्य यणादेशो न शब्द माश्रित्य गुण इत्यमन्तरङ्गत्वाद् गुण एव स्यादित्युक्तम्।

अत्र कैयटः- सिवेर्बाहुलकादौणादिके न प्रत्यये गुणवलोपोढां प्रसंग ऊठपवादत्वावलोपं बाधते गुणं त्वन्तरङ्गत्वाद् बाधते। गुणो हि अंग सम्बधिनी मिग्लक्षणां लध्वीमुपधामार्द्ध धातुकं चाश्रयति ।

ऊठ तु वकारान्तमङ्गमनु नासिकादिकञ्च प्रत्ययमित्यल्पायेक्षत्वादन्तरङ्गः। तत्र कृते यण्गुणौ प्राप्नुतं इति। एवञ्च संज्ञापेक्षस्यापि बहिरङ्गत्वं स्पष्टमेवोक्तमिति। न तरूतविधावपि बहुपदार्थपेक्षत्वरूप-बहिरङ्ग, त्वस्य गुणे, सत्वेन तत्र दोष कथनपर भाष्यसङ्गतेः। बहिरङ्गान्तरङ्ग, शब्दाभ्यां बह्यपेक्षत्वाल्पापेक्षत्वयोः शब्दमर्यादियाऽलाभाच्च। तथासति "असिद्धं बह्यपेक्षयल्पापेक्षः" इत्येव वदेत्। अतएव विप्रतिषेधसूत्रेभाष्ये गुणाद्यणा देशोऽन्तरङ्गत्वादित्यस्य "स्योन" इत्युदाहरणं न तु गुणादूट अन्तरङ्गङ्गत्वादित्युक्तम्। त्वहोत्या तदपि वक्तुम चितम्।

अतएव अन्तरङ्गे कर्त्तव्ये जातं तत्काल प्राप्तिकश्च बहिरङ्गमसिद्धमित्यर्थः। बवादिषु पदसंस्कारपक्षे समानकाल-त्वमेव द्वयोरिति बोध्यम्।

एतेन "अन्तरङ्गं बहिरङ्गाद् बलीयः" इति परिभाषन्तरमित्ययास्तम्। एनामाश्रित्य "विप्रतिषेध" सूत्रे भाष्ये तस्याः प्रत्यारव्यानाच्च।

इयं च त्रिपाद्यां न प्रवर्तते, त्रिपाद्या असिद्धत्वात्। अस्याश्च "वाह ऊठ" सूत्रस्थभूग्रहणं ज्ञापकमित्येषा सयादसप्ताध्या-यीस्था अन्यथा सम्प्रसारणमात्रविधानेन लघूपध गुणे वृद्धिरेचि इति वृद्धौ "विश्वौह" इत्यादिसिद्धस्तद्वं यव्यं स्पष्ट मेव। सत्यां होतस्यां बहिरङ्गसम्प्रसारण स्यासिद्धत्वाद् लघुपधगुणो न स्यात्। न च पुगन्त इति सत्र निमित्तको विशेषणमत एव "भिनत्ती" त्यादो न गुणः एवञ्च "नाजानन्तर्ये" इति निषेधात्कथं परिभाषा प्रवृत्तिरिति वाच्यम्।

एवञ्च कार्यकाल पक्षे त्रिपाद्यमितत्प्रवृत्तिर्दुवरिति वाच्यम्। पूर्वप्रति परस्यासिद्धत्वा दन्तरङ्गाभावेन पूर्वस्य तन्निरूपित बहिरङ्गत्वा भावात्तया।

असिद्धं बहिरङ्गमन्तरङ्गे, "इति परिभाषाया प्रौढ मनोरमाकारे असिद्धमिति क्रिम? इति शङ्काये उदाहरिष्यते तेन पचावेदम् इत्यादावेत ऐत्वं न। तेनेति पूर्वा तु अन्तरङ्ग बहिरङ्गयोर्युगयत्प्राप्तावेति भावः।

अर्थात- अन्तरङ्ग शास्त्रस्य दृष्ट्या बहिरङ्ग, शास्त्रं असिद्धं भवति यतोहि- पचावइदम्" इत्यत्र "आदगुणः" इतिसूत्रेण गुणं, भूत्वा यदा पचावेदम" इति रूपं निष्पन्न। तर्हि - एत ऐ " इति सूत्रेण "वे" इति ऐकारस्य नेत्वं भवति। किमश्च एकं एत् "इति शब्दापेक्षया "एत ऐ" इति सूतं अन्तरङ्ग, अस्ति । तथापि "आदगुणः" इति सूत्रे अवर्ण एवं परे अच्स्यपेक्षया आद्गुणः सूत्रं बहिरङ्ग अस्ति। अतः अत्र आदगुणः इति सूत्रं बहिरङ्गस्यपेक्षया असिद्धं भवति। एवं "एते ऐ" "इति सूत्रं अंन्तरङ्ग शास्त्रस्यपेक्षया अत्रसिद्धं भवति।

वैयाकरण सिद्धान्त कौमुदीकारेण मतेन" अकृतव्यूहाः पाणिनीयाः निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वन्तीत्यर्थः अकृतव्यूहा इति यद्यपि कृतमपि कार्यं निवर्तयन्ति इति परिभाषान्तरं पठ्यते। फलं च तुल्यम् तथापि अकृत इत्येव लघु "प्रक्षालनाद्धि" पंकस्य दूरादस्पर्शनं वरम्। इति न्यादिति भावः।

यत्तु एवंरीत्या पूर्वस्थानिक मपिन्तरङ्गमिति। तच्चिन्त्यम् सृजिष्ठ इत्यादौ विन्मतोलकि टिलोपस्यापवावविन्मतोल-प्रवृत्या जातिपक्षाश्रयणेन वारण प्रयासस्य प्रकृत्येकाच् इति सूत्र प्रयोजनवयनावसरे भाष्यकृत्कृतस्य नष्फल्यापत्तः। त्वयुक्तरीत्या विन्मतोलको बहिरङ्गासिकत्वेन अनायास-तस्तद्वारणात् भाष्य ईदृशरीत्या बहिरङ्गासिद्धत्वस्य क्वाप्यनाश्रयणाच्चा परिभाषायायशब्दस्य निमित्तपरत्वाच्च। इयं - चोत्तरपदाधिकारस्थबहिरङ्गस्य नासिद्ध त्वबोधिकेति च एकाचोऽम् इति सूत्रे भाष्ये पूर्वपक्ष्युक्तिरिति सा नादर्तव्या।

परन्तप इत्यादावनुस्वारे नासिद्धत्वं मुमस्त्रिपाद्यां तवप्रवृत्तः नव्यमतेऽपि यथोदेशपक्षा श्रयणेनान्यथासिद्धोबाहरणदानेन तस्य तदुक्तित्वमावश्यक मित्याहुः। आभीयेऽन्तरङ्गे, आभीयस्य बहिङ्गस्य समान्याश्रयस्य नानेनानि सिद्धि वृद्धर्येन नाप्रतिमाने नासिद्धत्वयसिद्धत्वादित्यसिद्ध वत्सूत्रे भाष्ये स्पष्टम्। एवं एवं येन नाप्राप्तिन्यायेनान्तरङ्गबाधकत्वमूलकं न सिच्यन्तरङ्गमस्तीति 'इको गुणवृद्धी' इति सूत्रे भाष्ये स्पष्टम्।

**सन्दर्भग्रन्थाः**

१ प्रौढमनोरमा ग्रन्थ

२ वैयाकरणसिद्धान्त कौमुदी (परिभाषा प्रकरण)

३ परिभाषेन्दुशेखरे (नागेशभट्ट)

४ महाभाष्य ग्रन्थेः

५ वाक्यवदीयम्